चक्षुः पूर्व्वं त्वमभिर्भवान्। विजेष्यसि रणे शत्रूनपि सर्वान् दिवौकसः। प्रीत्या च तेऽहं दास्यामि यदस्त्रमनिवारितम्। त्वं हि शक्तो मदीयं तदस्त्रं धारयितुं चणात्। वैशम्पायन उवाच। ततो देवं महादेवं गिरिशं शूलपाणिनम्। ददर्श फाल्गुनस्तत्र सह देव्या महाद्युतिम्। स जानुभ्यां महीं गत्वा शिरसा प्रणिपत्य च। प्रसादयामास हरं पार्थः परपुरञ्जयः"।

**किराततिक्त** पु॰ किरातो भूनिम्बइव तिक्तः (चिराता) इत्यमरः "किराततिक्तस्तु हिमस्तिक्तः पित्तकफापहः" भावप्र॰

**किरातार्ज्जुनीय** न॰ किरातश्चार्ज्जुनश्चाधिकृत्य कृतोग्रन्थः "द्वन्द्वाच्छः" पा॰छ। भारविकविप्रणीते अष्टादशसर्गात्मके महाकाव्यभेदे

**किराताशिन्** पु किरातानश्नाति अश–णिनि६त॰। गरुडे शब्दर॰ तस्य किराताशनकथा भा॰आ॰२८अ॰ यथा "इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत्। गच्छाम्यहममृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम्। विनतोवाच। समुद्रकुक्षावेकान्ते निषादालयमुत्तमम्। निषादानां सहस्राणि तान् भुक्त्वाऽमृतमानय। न च ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन। अवध्यः सर्व्वभूतानां ब्राह्मणो ह्यनलोपमः। अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः। गुरुर्हि सर्व्वभूतानां ब्राह्मणः परिकीर्त्तितः। एवमादिभीरूपैस्तु सतां वै ब्राह्मणो मतः। स ते तात! न हन्तव्यः संक्रुद्धेनापि सर्व्वथा। ब्राह्मणानामभिद्रोहो न कर्त्तव्यः कथञ्चन। न ह्येवमग्निर्नादित्यो भस्म कुर्य्यात्तथानघ!। यथा कुर्य्यादभिक्रुद्धो ब्राह्मणः संशितव्रतः। तदेतैर्विविधैर्लिङ्गैस्त्वं विद्यास्तं द्विजोत्तमम्। भूतानामग्रभूर्विप्रो वर्णश्रेष्ठः पिता गुरुः। गरुड़ उवाच। किंरूपो ब्राह्मणो मातः किंशीलः किंपराक्रमः। किंस्विदग्निनिभो भाति किंस्वित् सौम्यप्रदर्शनः। यथाहमभिजानीयां ब्राह्मणं लक्षणैः शुभैः। तन्मे कारणतो मातः! पृच्छतो वक्तुमर्हसि। विनतोवाच। यस्ते कण्ठमनुप्राप्तो निगीर्णं वड़िशं यथा। दहेदङ्गारवत् पुत्र! तं विद्याब्राह्मणर्षभम्। विप्रस्त्वया न हन्तव्यः संक्रुद्धेनापि सर्व्वदा। प्रोवाच चैनं विनता पुत्रहार्द्दादिदं वचः। जठरे न च जीर्य्येद्यस्तं जानीहि द्विजोत्तमम्। पुनः प्रोवाच विनता पुत्रहार्द्दादिदं वचः। जानात्यप्रतुलं वीर्य्यमाशीर्व्वादपरायणा। प्रीता परमदुःखार्त्ता नागैर्विप्रकृता सती"। "सौतिरुवाच। ततः स मातुर्व्वचनं निशम्य वितत्य पक्षौ नभ उत्पपात। ततो निषादान् बलवानुपागतो बुभुक्षितः काल इवान्तकोऽपरः। स तान्निषादानुपसंहरंस्तदा रजः समुद्धूय नभःस्पृशन्महत्। समुद्रकुक्षौ च विशोषयन् पयः समीपजान् भूधरजान् विचालयन्। ततः स चक्रे महदाननं तदा निषादमार्गं प्रतिरुध्य पक्षिराट्। ततो निषादास्त्वरिताः प्रवव्रजुर्यतो मुखं तस्य भुजङ्गभोजिनः। तदाननं विवृतमतिप्रमाणवत् समभ्ययुर्गगनमिवार्द्दिताः खगाः। सहस्रशः पवनरजोविमोहिता यथाऽनिलः प्रचलितपादपे वने। ततः खगो वदनममित्रतापनः समाहरत् परिचपलो महाबलः। निसूदयन् बहुविधमत्स्यजीविनो बुभुक्षितो गगनचरेश्वरस्तदा"।

**किराति** स्त्री किरेण समन्तात् जलक्षेपेण अतति गच्छति अत इन् ३त॰। १गङ्गायां जटा॰ तस्या योजनपर्य्यन्तजलक्षेपेण हिमाचलात् समुद्रपर्य्यन्तगमनात्तथात्वम्। वा ङीप्। तत्रैव। २किरातवेशधारिण्यां दुर्गायाञ्च तस्याः किरातवेशधारणं यथा तथा, किरातशब्दे दर्शितम्।

**किरातिनी** स्त्री किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्या इनि ङीप्। जटामांस्यां शब्दर॰।

**किरि** पुंस्त्री किरति भूमिम् कृ–कृगृशॄदि॰ इक्। भूविदारे १शूकरे अमरटी॰ भरतः स्त्रियां ङीप्। २मेघे च तस्य जलक्षेपकत्वात् तथात्वं किरिकः

**किरिक** पु॰ किरिर्मेघ इव कायति कै–क। सजलमेघ तुल्ये रुद्रभेदे। "नमो वः किरिकेभ्यो देवानां हृदयेभ्यः" यजु॰१६,४६। [ङि। हिन्ताले अमरः २फले त्रिका॰।

**किरिटि** न॰ किरिणा शूकरेण टल्यते विह्वल्यते टल विह्वले

**किरीट** पुंन॰कॄ–ईटन् किच्च। १मुकुटे २शिरोवेष्टने (पागड़ि) च शब्दचि॰ दशाननकिरीटेभ्यः सा॰द॰। किरीटबद्धाञ्जयोनिपेतुः" रघुः [ शब्दचि॰।

**किरीटमालिन्** पु॰ मल–सम्बन्धे णिनि ६त॰। अर्ज्जुने

**किरीटिन्** पु॰ किरीटोऽस्त्यस्य इनि। अर्ज्जुने भा॰वि॰ ४४अ॰। "पुरा शक्रेण मे बद्धं युध्यतो दानवर्षभैः। किरीटं मूर्द्ध्नि सूर्य्याभं तेनाहुर्मां किरीटिनम्" उत्तरसमीपेऽर्ज्जुनेन स्वनामभेदनिरुक्तिकथनात्तस्य तथात्वम्। शक्रेण तस्य मूर्द्धनि किरीटयोजनकथा च "ततोमातलिसंयुक्तं मयूरसमरोमभिः। हयैरुपेतं प्रादान्मे रथं दिव्यं महाप्रभम्। बबन्ध चैव मे मूर्द्ध्नि किरीटमिदमुत्तमम्। स्वरूपसदृशं चैव प्रादादङ्गविभूषणम्।